# ॥ वाल्मीकि रामायण॥

## ६ युद्धकाण्ड

### अध्याय ६४

निकुम्भो भ्रातरं दृष्ट्वा सुग्रीवेण निपातितम् ।
प्रदहन्निव कोपेन वानरेन्द्रमवैक्षत ॥१॥

ततः स्रग्दामसंनद्धं दत्तपञ्चाङ्गुलं शुभम् ।
आददे परिघं वीरो नगेन्द्रशिखरोपमम् ॥२॥

हेमपट्टपरिक्षिप्तं वज्रविद्रुमभूषितम् ।
यमदण्डोपमं भीमं रक्षसां भयनाशनम् ॥३॥

तमाविध्य महातेजाः शक्रध्वजसमं रणे ।
विननाद विवृत्तास्यो निकुम्भो भीमविक्रमः ॥४॥

उरोगतेन निष्केण भुजस्थैरङ्गदैरपि ।
कुण्डलाभ्यां च मृष्टाभ्यां मालया च विचित्रया ॥५॥

निकुम्भो भूषणैर्भाति तेन स्म परिघेण च ।
यथेन्द्रधनुषा मेघः सविद्युत्स्तनयित्नुमान् ॥६॥

परिघाग्रेण पुस्फोट वातग्रन्थिर्महात्मनः ।
प्रजज्वाल सघोषश्च विधूम इव पावकः ॥७॥

नगर्या विटपावत्या गन्धर्वभवनोत्तमैः ।
सह चैवामरावत्या सर्वैश्च भवनैः सह ॥८॥

सतारागणनक्षत्रं सचन्द्रं समहाग्रहम् ।
निकुम्भपरिघाघूर्णं भ्रमतीव नभस्तलम् ॥९॥

दुरासदश्च सञ्जज्ञे परिघाभरणप्रभः ।
क्रोधेन्धनो निकुम्भाग्निर्युगान्ताग्निरिवोत्थितः ॥१०॥

राक्षसा वानराश्चापि न शेकुः स्पन्दितुं भयात् ।
हनूमंस्तु विवृत्योरस्तस्थौ प्रमुखतो बली ॥११॥

परिघोपमबाहुस्तु परिघं भास्करप्रभम् ।
बली बलवतस्तस्य पातयामास वक्षसि ॥१२॥

स्थिरे तस्योरसि व्यूढे परिघः शतधा कृतः ।
विशीर्यमाणः सहसा उल्का शतमिवाम्बरे ॥१३॥

स तु तेन प्रहारेण चचाल च महाकपिः ।
परिघेण समाधूतो यथा भूमिचलेऽचलः ॥१४॥

स तथाभिहतस्तेन हनूमान्प्लवगोत्तमः ।
मुष्टिं संवर्तयामास बलेनातिमहाबलः ॥१५॥

तमुद्यम्य महातेजा निकुम्भोरसि वीर्यवान् ।
अभिचिक्षेप वेगेन वेगवान्वायुविक्रमः ॥१६॥

ततः पुस्फोट चर्मास्य प्रसुस्राव च शोणितम् ।
मुष्टिना तेन सञ्जज्ञे ज्वाला विद्युदिवोत्थिता ॥१७॥

स तु तेन प्रहारेण निकुम्भो विचचाल ह ।
स्वस्थश्चापि निजग्राह हनूमन्तं महाबलम् ॥१८॥

विचुक्रुशुस्तदा सङ्ख्ये भीमं लङ्कानिवासिनः ।
निकुम्भेनोद्धृतं दृष्ट्वा हनूमन्तं महाबलम् ॥१९॥

स तथा ह्रियमाणोऽपि कुम्भकर्णात्मजेन हि ।
आजघानानिलसुतो वज्रवेगेन मुष्टिना ॥२०॥

आत्मानं मोचयित्वाथ क्षितावभ्यवपद्यत ।
हनूमानुन्ममथाशु निकुम्भं मारुतात्मजः ॥२१॥

निक्षिप्य परमायत्तो निकुम्भं निष्पिपेष च ।
उत्पत्य चास्य वेगेन पपातोरसि वीर्यवान् ॥२२॥

परिगृह्य च बाहुभ्यां परिवृत्य शिरोधराम् ।
उत्पाटयामास शिरो भैरवं नदतो महत् ॥२३॥

अथ विनदति सादिते निकुम्भे
पवनसुतेन रणे बभूव युद्धम् ।
दशरथसुतराक्षसेन्द्रचम्वोर्
भृशतरमागतरोषयोः सुभीमम् ॥२४॥

The files in this directory are revised versions of the digital files produced by Professor Muneo Tokunaga, Kyoto University, and copyrighted by him. I am grateful to Professor Tokunaga for his agreement to this use of his original files and for permitting the revised versions to be made publicly available.
Dr J. D. Smith ; email: jds10@cam.ac.uk ; http://bombay.oriental.cam.ac.uk/index.html

ITRANS conversion questions to: Avinash Chopde ¡avinash@acm.org¿

Last updated on March 25, 1998; Send corrections to sanskrit@cheerful.com